श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री तिरुमलै अनन्तार्यस्वामि अनुगृहीता

# ॥ श्री रामानुजचतुःश्लोकी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रामानुजचतुःश्लोकी ॥

अखिलात्म गुणावासं अज्ञान तिमिरापहम्।
आश्रितानां सुशरणं वन्देऽनन्तार्य देशिकम्॥

श्रीमद् रामानुजाचार्य श्रीपादांभोरुहद्वयम्।
सदुत्तमाङ्ग सन्तार्यम् अनन्तार्यमहं भजे॥

अनिशं भजतामनन्यभाजां
चरणाम्भोरुहमादरेण पुंसाम्।
वितरन्निभृतं विभूतिमिष्टां
जय रामानुज ! रङ्गधाम्नि नित्यम्॥ 1 ॥

भुविनोविमतांस्त्वदीयसूक्तिः
कुलिशीभूय कुदृष्टिभिस्समेतान्।
शकलीकुरुते विपश्चिदीड्या
जय रामानुज ! शेषशैलशृङ्गे॥ 2 ॥

श्रुतिषु स्मृतिषु प्रमाणतत्त्वं
कृपयालोक्य विशुद्धया हि बुद्ध्या।
अकृथास्स्वत एव भाष्यरत्नं
जय रामानुज ! हस्तिधाम्नि नित्यम्॥ 3 ॥

जय मायिमतान्धकारभानो !
जय बाह्यप्रमुखाटवीकृशानो !।

जय संश्रितसिन्धुशीतभानो !
जय रामानुज ! यादवाद्रिशृङ्गे ॥ 4 ॥

रामानुजचतुःश्लोकीं यः पठेन्नियतस्सदा।
प्राप्नुयात् परमां भक्तिं यतिराजपदाब्जयोः ॥ 5 ॥

॥ इति श्री रामानुजचतुःश्लोकी समाप्ता ॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi